साहित्य शास्त्री - I

अभिज्ञानशाकुन्तलम्

पञ्चमोऽङ्कः

Date __/__/____

प्र० (1) - पद्यमिदम् व्याख्येयम्।

प्रजागरात्खिलीभूतस्तस्याः स्वप्ने समागमः।
बाष्पस्तु न ददात्येनां द्रष्टुं चित्रगतामपि॥

उत्तरम् - प्रसङ्गः - प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य अभिज्ञानशाकुन्तलम्-नाट्यशास्त्रस्य पञ्चमोऽङ्कात् उद्धृतोऽस्ति। अस्मिन् श्लोके राजा दुष्यन्तः आत्मनो दुःख-सहनाशक्तत्वं कथयन् राजा दुष्यन्तो माधव्यं ब्रूते -

व्याख्या - प्रजागरात् = रात्रिजागरणात्, तस्याः = मम प्रियायाः शकुन्तलायाः स्वप्ने = निद्रायां, समागमः = मत्समीपागमनमिति स्वप्नसमागमः दर्शनं तु खिलीभूतः = उपहतः प्रतिहतः निषिद्धः, अनिद्रया विनाशितः विघ्नितः किञ्च बाष्पः तां तां पूर्वावस्थां स्मरतो मे दुःखान्नेत्राभ्यां स्रवदश्रुजलम् तु चित्रगतामपि = आलेख्ये लिखितामपि एनां प्रियां द्रष्टुं = अवलोकयितुं न ददाति = दर्शनं प्रतिबन्धे, चित्रादिना मनोविनोदनमपि मे दैवं न सहते किं करोमि मन्दभाग्यः इति भावः। अत्र हेत्वनुप्रासौ अलंकारौ अनुष्टुप छन्दश्च।

Renu Devi
23/12/20

राधा उमाकान्त सं० महावि० सुरवसेना,
पूर्णिया।

Page No.

साहित्य    शास्त्री-II

रघुवंश महाकाव्यम् -त्रयोदशः सर्गः

Date __/__/__

प्र०(1)- त्वं रक्षसा भीरु! यतोऽपनीता तं मार्गमेताः कृपया लता मे ।
अदर्शयन् वक्तुमशक्नुवत्यः शाखाभिरावर्जितपल्लवाभिः ॥

उत्तरम्- प्रसंगः- प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य रघुवंश महाकाव्यस्य त्रयोदशसर्गात् उद्धृतोऽस्ति ।

अस्मिन् श्लोके श्रीरामः सीतां प्रति कथयति -

व्याख्या- हे भीरु! = भयशीले सीते! त्वम् = भवती । रक्षसा = राक्षसेन रावणेन । यतः = येन मार्गेण । अपनीता = अपहृता । तम् = तादृशम् मार्गम् = पन्थानम् । वक्तुम् = भाषितुम् । अशक्नुवत्यः = असमर्थाः, वागिन्द्रियाभावाद्वक्तुमसमर्थाः । एताः = इमाः । लताः = वल्लयः आवर्जितपल्लवाभिः = पाणिस्थानीयाभिर्नमितकिसलयाभिः । शाखाभिः । शाखाभिः = भुजस्थानीयैः विटपैः । कृपया = दयया । मे = मम कृते । अदर्शयन् = दर्शितवत्यः । असूचयन्निति

अयि भयशीले जानकि! रावणः त्वामपहृत्य येन मार्गेण गतवान्, तं मार्गं मानवा इव वक्तुमसमर्था एता लताः दयार्द्राः सत्यः अङ्गुलिभिरिव अवनमितकिसलयैर्विटपैरदर्शयन् । अत एतास्ते सख्यः ताः पश्य, यतो हि चैतन्यात् वृक्षलतादयोऽपि समदुःखभाजो भवन्ति । तथाहि भगवान् मनुः -

"तमसा बहुरूपेण वेष्टिताकर्महेतुना ।
अन्तः संज्ञा भवन्त्येते सुखदुःखसमन्विताः ॥"

Renu Devi
23/12/20

रा० धा० उमाकान्त सं० महावि० सुखसेना, पूर्णिया

Page No.

साहित्य उपशास्त्री-II तृतीय-पत्रम्

रघुवंश - महाकाव्यम्

द्वितीयः सर्गः

(1) प्र० - पद्यमिदम् व्याख्येयम् ।

तं विस्मितं धेनुरुवाच साधो! मायां मयोद्भाव्य परीक्षितोऽसि।
ऋषिप्रभावान्मयि नान्तकोऽपि प्रभुः प्रहर्तुं किमुतान्यहिंस्राः ।

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य रघुवंश महाकाव्यस्य द्वितीय सर्गात् उद्धृतोऽस्ति। अस्मिन् श्लोके नन्दिनी राजा दिलीपं प्रति - उवाच -

व्याख्या:- विस्मितं = विस्मयान्वितम्, चकितं वा, तं = राजानं दिलीपम्, धेनुः = नन्दिनी, उवाच = अवदत्, साधो! = हे सज्जनशिरोमणे!, मया = नन्दिन्या, मायां = शाम्बरीम्, उद्भाव्य = कल्पयित्वा, परीक्षितोऽसि = सम्यक् परीक्षितोऽसि, ऋषिप्रभावात् = वसिष्ठतपोऽनुभावात्, मयि = नन्दिन्याम्, अन्तकोऽपि = यमोऽपि, प्रहर्तुम् = प्रहारं कर्तुम्, न प्रभुः = नैव समर्थः। अन्यहिंस्रा = इतरे घातुकाः, प्राणिनः = क्षुद्राणि सिंहादि घातुकान्तराणि वा किमुत अतितरामेव न प्रभवन्ति ।

Renu Devi
23/12/20

राधा उमाकान्त सं० महावि० सुखसेना,
पूर्णिया ।

Page No.

साहित्य उपशास्त्री - I तृतीय - पत्रम्
रघुवंश महाकाव्यम् -
द्वितीयः सर्गः

Date ___/___/______

प्र० (1) - पद्यमिदम् व्याख्येयम्।

ततो मृगेन्द्रस्य मृगेन्द्रगामी वधाय वध्यस्य शरं शरण्यः।
जाताभिषङ्गो नृपतिर्निषङ्गादुद्धर्तुमैच्छत् प्रसभोद्धृतारिः॥

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य रघुवंश महाकाव्यस्य द्वितीय सर्गात् उद्धृतोऽस्ति।

अस्मिन् श्लोके सिंहगमनः शरणागतवत्सलो राजा दिलीपः नन्दिन्यां स्थितं सिंहं विलोक्य तदाक्रमेणात्मनः पराजयं मन्यमानः आक्रमणकारिणः तस्य वधाय तूणीरात् बाणं निष्कासयितुमियेष।

व्याख्या - ततः = सिंहदर्शनानन्तरम्, मृगेन्द्रगामी = सिंहगतिः, शरण्यः = शरणागतवत्सलः, प्रसभोद्धृतारिः = बलादुन्मूलितशत्रुः, नृपतिः = राजा दिलीपः, जाताभिषङ्गः = जातपराभवः सन्, वध्यस्य = वधार्हस्य, मृगेन्द्रस्य = सिंहस्य, वधाय = व्यापादनाय, निषङ्गात् = तूणीरात्, शरं = बाणम्, उद्धर्तुम् = निष्कासयितुम्, ऐच्छत् = अभिलषितवान्।

Renu Devi
23/12/20

राधा उमाकान्त सं० महावि० सुखसेना, पूर्णिया।

Page No.